प्तवचनम् । स्त्रियां वयोवाचित्वात् ङीप् । "त्रीणि वर्षाण्युदीक्षेत कुमार्य्यृतुमती सती" मनुः । ७सिन्धुनदे शब्दर० । ८अर्हदुपासकभेदे हेमच० । ९शाकद्वीपेश्वरपुत्रभेदे १०तदीयवर्षभेदे च विष्णुपु० "शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः । सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त च । जलदश्च कुमारश्च सुकुमारो मणीवकः । कुसुदोदः, समोदाकिः सप्तमश्च महाद्रुमः । तत्संज्ञान्यपि तान्येव सप्तवर्षाण्यनुक्रमात्" । ११शुक्तिमत्पर्व्वतोद्भवे ऋषिकुल्याभेदे "ऋषिकुल्याः कुमाराद्याः शुक्तिमत्पादसम्भवाः" विष्णुपु० । १२सुन्दरे त्रि० । १३अविवाहितावस्थायामुपचारात् । "कौमारापूर्व्ववचने„ पा० । "अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्" मनुः । अतएव अन्नदाकल्पे "एकवर्षा भवेत्सन्ध्या इत्यादिना षोड़शवर्षान्ताया अपि कुमारीत्वमुक्तम् । तत्र बालके "कुमारं माता बिभर्त्ति" ऋ० ५,२,१, कुमारस्य रेतः सिक्तं न सम्भवति" "शत०ब्रा० १,४,५,७, "कन्यानां संप्रदानञ्च कुमाराणाञ्च रक्षणम्" मनुः नाट्योक्तिं विनापि काव्ये राजदारके कुमारशब्दः प्रयुज्यते । "आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः" । "कुमारसैन्यं सपदि स्थितं च तत्" रघुः "तदानुजग्मतुः स्थाणुं कुमाराविव पावकी" रामा० । विश्वसारोक्ते १५मन्त्रभेदे पु० १६विद्यायां स्त्री ङीप् । मन्त्रविशेषाणां संज्ञाभेदाश्च तन्त्रसारे दर्शिता यथा

विश्वसारे निबन्धे च । "छिन्नोरुद्धः शक्तिहीनः पराङ्मुख उदीरितः । बधिरोनेत्रहीनश्च कीलितः स्तम्भितस्तथा । दग्धः स्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः । भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्च्छितः । हृतवीर्य्यश्च भीमश्च प्रध्वस्तोबालकः पुनः । कुमारश्च युवा प्रौढोवृद्धो निस्त्रिंशकस्तथा । निर्व्वीजः सिद्धिहीनश्च मन्दः कूटस्तथा पुनः । निरंशकः सत्वहीनः केकरोजीवहीनकः । धूमितालिङ्गितौ स्यातां मोहितश्च क्षुधार्त्तकः । अतिदीप्तोऽङ्गहीनः स्यादतिक्रुद्धः समीरितः । अतिक्रूरश्च सव्रीडः शान्तमानस एव च । स्थानभ्रष्टश्च विकलोनिःस्नेहः परिकीर्त्तितः । अतिवृद्धः पीडितश्च वक्ष्याम्येषान्तु लक्षणम् । मनोर्यस्यादिमध्यान्तेष्वानिलं वीजमुच्यते । संयुक्तं वा वियुक्तं वा पुराक्रान्तस्त्रिधा पुनः । चतुर्द्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः । आदिमध्यावसानेषु भूवीजद्वयलाञ्छितः । रुद्धमन्त्रः स विज्ञेयोभुक्तिमुक्तिविवर्जितः । मायात्रितयश्रीवीजराकाहीनस्तु योमनुः । शक्तिहीनः स कथितो यस्य मध्ये न विद्यते । कामवीजं मुखे माया शिरस्यङ्कुशमेव च । असौ पराङ्मुखः प्रोक्तोहकारो विन्दुलाञ्छितः । आद्यन्तमध्ये विन्दुर्व्वा न भवेद्बधिरः स्मृतः । पञ्चवर्णोमनुर्यः स्याद्रेफार्केन्दुविवर्ज्जितः । नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः । आदिमध्यावसानेषु हंसप्रासादवाग्भवौ । हकारोविन्दुमान् जीवो वाचश्चापि चतुःकलः । माया नमामि च पदं नास्ति यस्मिन् स कीलितः । एकं मध्ये द्वयं मूर्द्ध्नि यस्मिन्नस्त्रपुरन्दरौ । न विद्येते स मन्त्रस्तु स्तम्भितः सिद्धिवर्ज्जितः । वह्निर्वायुसमायुक्तो यस्य मन्त्रस्य मूर्द्धनि । सप्तधा दृश्यते तन्तु दग्धमन्त्रं प्रचक्षते । अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यतेऽक्षरैः । स्त्रस्तः सोऽभिहितो यस्य मुखे न प्रणव स्मृतः । शिवो वा शक्तिरथ वा भीताख्यः स प्रकीर्त्तितः । आदौ मध्ये तथा चान्ते यस्य मार्ण चतुष्टयम् । सएव मलिनो मन्त्रः सर्वविघ्नसमन्वितः । यस्य मध्ये दकारोऽस्ति कवचं मूर्द्धनि द्विधा । अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदाहृतः । द्वोद्वयं हृदये शीर्षे वषट्वौषट् तु मध्यमे । सएव भेदितोमन्त्रः सर्वशास्त्रविवर्ज्जितः । त्रिवर्णो हंसहीनोयः स सुषुप्तउदाहृतः । मन्त्रोवाप्यथ वा विद्या सप्ताधिकदशाक्षरा । फट्कारपञ्चकादिर्योमदोन्मत्त उदाहृतः । तद्वदस्त्रं स्थितं मध्ये यस्य मन्त्रः स मूर्च्छितः । विरामेऽस्त्रस्य यो मन्त्रो हृतवीर्य्यः स उच्यते । आदौ मध्ये तथा चान्ते चतुरस्त्रयुतोमनुः । ज्ञातव्योभीम इत्येष यः स्यादष्टादशाक्षरः । एकोनविंशत्यर्णो वा योमन्त्रस्तारसंयुतः । हृल्लेखाङ्कुशवीजाढ्यं प्रध्वस्तं तं प्रचक्षते । सप्तवर्णो भवेद्बालः कुमारोऽष्टाक्षरः स्मृतः । षोडशार्णो युवा प्रौढ़श्चत्वारिंशल्लिपिर्म्मनुः । त्रिंशदर्णश्चतुःषष्टिवर्णोमन्त्रः शताक्षरः । चतुःशताक्षरश्चापि वृद्धः स परिकीर्त्तितः । नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः । यस्यावसाने हृदयं शिरोमन्त्रौ च मध्यतः । शिखा वर्म्म च न स्यातां वौषट् फट्कार एव वा । शिवशक्त्यर्णहीनो वा स निर्वीजः उदाहृतः । एषु स्थानेषु फट्कारः षोढा यस्मिन् प्रदृश्यते । स मन्त्रः सिद्धिहीनः स्यान्मन्दः पङ्क्त्यक्षरोमनुः । कूट एकाक्षरो मन्त्रः स एवोक्तोनिरंशकः । द्विवर्णः सत्वहीनः स्याच्चतुर्व्वर्णस्तु केकरः । षडक्षरोजीवहीनः सार्द्धसप्ता-